द्यपन्याधिय इति बुद्धिमात्रभेदेन वस्तुभेदेन इत्यर्थः तस्मात्सर्वे मार्गास्त्वय्येव पर्यवस्यंतीति सदृष्टांतमा
ह यथेति अंगः सकाशात्स्रवंतः प्रभवंति या नद्यः पुनः पर्जन्येनापूरिता बहुस्रोतसः सत्यः सर्वतः सिं

युक्तेवविशंतीतियथातद्वितागतयोमार्गाअंतंतत्त्वामेवविशंतीति अत्रहेतुमाहसत्वमितितिनवतः
शक्तियद्विकृतिःतस्याःसत्वादयोगुणाःअतःप्राकृताःप्रकृतिकार्योपाधयोब्रह्मपर्यंताःस्थावरादयो
जीवाःस्वोपाधिद्वारातेषुगुणेषुप्रोताःप्रविष्टाःतेप्रकृतौसाचत्वयीतिअतःकार्येणोपाधिलयात्सर्वेपि
त्वामेवप्रविशंतीतियद्वाभवतःप्रकृतेर्गुणेषुप्रोताब्रह्मादयोभवद्व्यतिरिक्तानसंतिअतस्त्वमेवसर्व
देवमयइतिनन्वत्रभवतःप्रकृतेरितिवदन्ममापिप्रकृतिसंबंधंब्रवीषिततश्चतेषांममचकोविशेषःस्या
दित्याशंक्यविशेषमाहनत्वमितिअविषक्तदृष्टयेअविलिप्तबुद्धयेकुतःसर्वात्मनोस्वव्यतिरिक्ताभा
वादविषक्तदृष्टित्वमित्यर्थःकिंचसर्वधियांसाक्षिणेसर्वबुद्धिसाक्षित्वान्नक्वापिबुद्धिलेपइत्यर्थः इतरे
तुसंसरंतीत्याहगुणप्रवाहइतिदेवतिर्यङ्मनुष्यात्मानोयेषांतेषुदेवादिशरीराभिमानिष्वित्यर्थःत्वद
विद्ययाकृतोयंगुणप्रवाहःप्रवर्ततेअतोमहान्विशेषइत्यर्थःसर्वात्मनेइत्यनेनोक्तंस्वरूपंस्तौति
अग्निर्मुखमितिद्वाभ्यांअग्न्यादीनवयवांश्चविराडवयवतयाविधीयतेयोयमग्निःतवमुखमित्यादिवचन स२
व्यत्ययाद्दिशांचक्षुःश्रोतिःश्रवणेंद्रियंकंमूर्धाप्राणाश्चबलंचततुःअध्ययःपरस्यतेआसक्तिनखानि
नकेवलमेतावदेवकिंतुसर्वोपिप्रपंचस्तवावयवएवेतिवदन्नेवंसत्यपिप्रपंचस्यविकारास्त्व ए६

यिनप्रसज्यंतेतस्यत्वयिकश्चित्वादित्याहत्वयीति अव्ययात्मन् अव्ययात्मनिउत्कर्षेप्रवृत्तौलोका
दयःसंज्ञितेप्रचलंतिहेअव्ययात्मन्नितिवाकथंत्वयिमनोमयेमनःप्रधानेमनोवृत्तिवैचित्र्ये
इत्ययतेत्वय्ययावृद्धामनसैवानुद्रष्टव्यइत्यादिश्रुतेःनलिययाजलौकसःसूक्ष्मप्राण्यंडराशयः
यथावोदुंबरांतःकेसरेषुमशकाःपरस्परवार्तानभिज्ञाःएवमनंतानिब्रह्मांडानित्वयिसंचरं
तीत्यर्थःतस्मादेवंभूतंतवरूपंदुरवगाहमितित्वदवतारकथामृतमेवसंतःसेवंतइत्याहयानि
यानीतिआम्नायपरिमार्जितानिकृपयेषांतेषांअतःस्वयमप्यवतारान्नमस्यतिनमइतित्वयशीर्षे
हयग्रीवायमधुकैटभयोर्मृत्यवेहंत्रेअकूपारायकूर्मायक्षित्युद्धारोविहारोयस्यतस्मैसौ[illegible]
पतयेपरशुरामायलंकाधीशरामंचतुर्व्यूहरूपेणप्रणमतिनमस्तेवासुदेवायेतिएवंस्तुत्वाबंध
मोचनंप्रार्थयितुमाहभगवन्नितिअसतिदेहादौयाहमायतयासः असन्ग्राह्यतयास्यतिवानवे
वजयंलोकःअहमपितथैवेत्याहअहंचेतिमद्रूपमेवप्रकटयतिविपर्यासमतिरितिअनित्येक
र्मफलेनित्यमितिअनात्मनिदेहेआत्मेतिदुःखरूपेगृहादौसुखमितिविपरीतमतिरित्यर्थःदेवदे
कुसुखदुःखादिषुआरमतिक्रीडतीतितथासःनतुदुःखेकुतोरतिस्तत्राहतमोविष्टःतमसा

व्याप्तः आत्मनः प्रियं प्रेमास्पदं त्वां न जाने इत्यर्थः सदृष्टांतमाह यथेति तस्मादज्ञादुःखवंती
तितदुःखवानित्यादीनिते तथा मायाछन्नं त्वामहं दिव्यापराङ्मुखः देहाद्यासक्तिमुखो वर्त्तइ
त्यर्थः न चैवं जानतः अतो विषयात्रिमुखं तत्राह नोत्सहे इति कृपणा विषयदासनायु
क्ताधीर्यस्य सः अत एव अंतःकामकर्मभ्यां हृतं लुंठितं इंद्रियैश्च बलिनिर्विषयसंयुक्तैरित
स्ततः आकृष्यमाणं रोद्धुं नियंतुं न शक्नोमीति तिदेवमस्वतंत्रोयं सोहं तव अंघ्र्युपगतः शर
णं प्राप्तः न चेंद्रियैः परतंत्रस्यैतदपि कुतः तत्राह तच्चापीति हे ईश अंतर्यामिन् तत्र अ
घ्र्युपगमनं च असतां दुरापं अतो भवतोऽनुग्रह एवेत्यहं मन्ये अनुग्रहसतीति वा ननु स
तां सेवया इदं भवति किं मदनुग्रहेणोच्यत आह पुंस इति जीवस्य संसारस्यापवर्गः समाप्तिः
यदा त्वत्कृपया भवेत्सं तावन्नास्पदं भवति हे अक्रूनात्ततुदासदुपासनासंपद्यते तर्हि वव
यिमतिर्भवेत्तत्त्वत्कृपां विना न सत्सेवा नितरां त्वन्मतिः ननतन्मां मुक्तिरित्यर्थः पादयोः पतनप्र
प्रार्थयते नम इति विज्ञानमेवमात्रामूर्तिर्यस्य तस्मै अत एव सर्वप्रत्ययहेतवे समस्तज्ञा
नकारणाय किं च पुरुषेशप्रधानाय पुरुषस्य ईशाः सुखदुःखप्रापकाः कालकर्मस्वभावाः

दयस्तेषां प्रधानाय नियंत्रे ब्रह्मन् कुतः ब्रह्मणोपरिछिन्नाय किं च अनंताः शक्तयो यस्य यद्वा अनंतामा
यारव्या शक्तिर्यस्य तस्मै अथवा प्रधानं प्रकृतिः तत्प्रवर्त्तकः पुरुषः ईशः कालः एतत्त्रितयात्मने ब्र
ह्मणे वक्ष्यति च भगवान् प्रकृतिर्ह्यस्योपादानमाधारः पुरुषः परः सतोभिव्यंजकः कालो ब्रह्मतत्
त्रितयं त्वहमिति सर्वप्रत्ययहेतुत्वमभिव्यंज[illegible]नुस्तौति नमस्ते इति वासुदेवायचि
त्ताधिष्ठात्रे सर्वभूतक्षयाय तत्क्षय आश्रयः अहंकारस्य प्राणिनामाश्रयः तत्स्थायंकाराधिष्ठात्रे
संकर्षणायेत्यर्थः हृषीकेशेति बुद्धिमनोधिष्ठात्रोः प्रद्युम्नानिरुद्धयोरेकीकृत्य शरणं शरणा
गतं मां पाहीति प्रार्थनं ॥ इति दशमे चत्वारिंशः ॥ ॥ एकचत्वारिंशके हरेर्नरजकं प्रविशन्पुरीं त
तो वरानदात्तुष्टः सुदाम्ने वायकस्य च सशांकमक्रूरमनःप्रमोदः स्वधामसंदर्शनसत्कृपा ततः स्वां
राजधानीं मथुरामपरथ्य दलंकृतानंतमहोत्सवाद्यां स्तुमौ वियति जलेवाया वत्सकृतानितानि
तव्येव संति तं च वा विपश्यतो मे किमद्भुतं अदृष्टं अपितु सर्वं दृष्टमित्यर्थः न नु पत्सादि पूर्वमेव
लं विस्मितमुखो लक्षितोसि अतो भूमौ वियति जलेवा किमद्भुतं दृष्टं वदेति अत आह यत्राद्भुता

नीतिं यत्त्वयि सर्वाण्यद्भुतानि तं त्वामिह पश्यतो मे ऽन्यत्र न्समादौ किमद्भुतं दृष्टं त्वां विना तत्र न किंचिद
द्भुतमित्यर्थः अलमनूरुः परमेश्वरेत्यर्थः असीति वा पाठः गांदिनी सुतो क्रूरः दृष्टिं नादद्भुः घरयंतं एवास्थिता
इत्यर्थः रामकृष्णागमनं प्रतीक्षमाणाः स्थिताः प्रतीतं विनीतं स्वगृहं चप्रविश्यतां अवमुच्य तत्रायी विश्रा
म्येत्यर्थः सायं ग्रः सरुगोपालैरित्यर्थः यस्मोवै नयस्य पादरजसः क्षालनो दकेन गर्तं गणस्थितेन श्री
कर्पः पुण्यकीर्त्यो हेः एकांतजनानां या गतिः तां बलेन अपुंसेन न पवित्रितचतुः या निरष्टिः स्वः स्वर्गो श्रि
ताः प्रार्थ्यमानो नमस्करोतिं देवदेवेति अतः परमन्यच्छ्रेयो नास्तीति मत्वा बहुधा संबोध
यति आदौ तावत्तु यदुवक्रा यदुपतीति यदु वक्रअक्रूतं कंसं हत्वा सुहृदां प्रियं वित्तरिष्यदाः
स्यामि रामकृष्णावानीतावितिस्वकृतं कमो विघसमप्येति गोपैः परिवारितः प्राविशात् कृष्णद
ष्टां पुरीमनुवर्णयति चतुर्भिः ददर्शतामिति स्फाटिकानि तुंगानि गोपुराणि पुरद्वाराणि अ
न्यानि बद्धाराणि यस्यां तां बृहंति हेममयानि कपाटानि तोरणानि च यस्यां तां ताम्रत्रआरः
आरकूटश्चतन्मयाः कोष्ठा धान्यागाराश्च शालादयो यस्यां तां परिखाः परितः खातगर्त्ताः ता १००

त्तिर्दुरासदां दुर्गमां उद्यानानि दूरस्थानि वनानि रम्याणि उपवनानि निकटानि बंतै रुपशोभितां
सौवर्णाः शृंगाटकाश्चतुष्पथाः हर्म्याणि धनिनां गृहाणि च निष्कुटैः उपकेचितः आरामाश्च तैः
श्रेणीनां एकशिल्पोपजीविनां सत्तात्तिः उपवेशनस्थानैः अन्यैश्च भवनैः गृहैः उपस्कृतां अलं
कृतां अमलः स्फटिकः हरितू मरकतः वैडूर्यादि रत्नैः क्लृप्तेषु वलभ्यादिषु आविष्टैः पारापतैर्ब
र्हि जिघ्रनादितां तत्र वलभ्यः गृहचूडा नागेषु वक्रदारु छादनानि वेदयः वज्र नीनामधो देशो क्षिवि
तावष्टंभवेदिका जलानुरक्ष्णाणि गवाक्षच्छिद्राणि कुट्टिमानि मणिबद्धा भूमयः ते सिक्तपथ्या राज
मार्गाः आपणाः पण्यवीथयः मार्गा अन्ये चत्वराण्यंगणानि संसिक्तानि रथ्यादीनि यस्यां तां स्रक्
स्रग्मालाद्या यस्यां तां तथास्त्वलंकृतानि द्वाराणि येषां ते गृहा यस्यां तां कैः राजनौः कुंभैः दध्ना चंद
नेन च तत्र च्छितैः सिक्तैः प्रसूनानां दीपानां च वलयो येषु तैः वृंदैः फलयुक्तैः उपलक्षितां रंभाः क्रमुकाः
तत्सहितैः सकेतुभिः केतवो ध्वजास्तत्सहितैः पट्टिका वितस्तिविस्तार पट्ट वस्त्राणि तत्सहितैः तत्रेयं रीतिः
द्वारेषु उभयतः स्तंभयोर्नामुपरि कुंभाः स्थाप्यंते तत्परितः प्रसूनाक्लयः ~~[illegible]~~ उपप
ट्टिकाः मुरवेष्टकादिपल्लवाः तदुपरिपात्रैस्तैरदीपावलयस्तत्सन्निधौ रंभाः क्रमुकाः केतवस्तोरणानि

वेतिनरदेवानांवर्त्मनाराजमार्गेणतांपुरींसंप्रविष्टौद्वितीयांतंश्रौत्सुक्यमेवाहद्वयेनकाश्चिदितिवि
पर्यकृविपरीतंधृत्तानिवस्त्राणिरुषणानिवयानिस्ताःयुगलेषुकुंडलंकंकणादिषुएकंविस्म
त्यसमीपुंकृतमेकमेवपत्रंययोःतेश्रवणेयासांएकमेवनूपुरंचरणेतरणंयासांताश्चताश्च
नांक्वात्रनंक्वाएकस्मिन्नेवलोचनेकज्जलंनिधायेतितवलोजनंपश्यन्त्याअभ्यज्यमानाःसखिभिः
क्रियमाणतैलाभ्यंगाःअकृतस्नानाःअपोह्यनिस्यंप्रगल्भायालीलाःतान्निहसितानीक्षणाः
निवर्तैःश्रियंरमयतीतिश्रीरमणःतेनात्मनावसुधाधिपतासांहृदयामुत्सवंददत्मनांसिजहारकृ
कृत्वातज्जतत्वेतस्सःसत्यस्तंदृष्ट्वातस्यप्रेक्षणंवरक्ष्मेतंत्वतदेवस्तुध्यातयाउत्कंठांसंवनंतेनल
भीमानीयाजिह्वाःदृश्याउद्घाटितनेत्रद्वारेणात्मनिमनसिलब्धंप्राप्तंपरिष्वज्यलदप्राप्तिजनितमा
धिंवर्धयांचक्रुःअरिंदमनिर्जितकामेतिसंबोधनंश्टंगाररसेनिमग्नोमात्तदितिसौमनस्येःसुमनः
समूहैःगोत्तनत्रावैर्वापौराःपुरस्त्रियःरजकोवस्त्रनिर्णेजकःसएववस्त्राणांरंगमपिकर्वन्गैरंको
रःरुषितःकुपितःहेत्वहत्ताःगिरोवनेचरथयेनिरंतेयूयंपरिधत्तेतिसंतावनायांलोट्अत्तीक्षथ
प्रार्थयध्वंराजकुलानिराजकीयाःजुंपंतिनिःस्वंकुर्वंतिवासकोरान्वस्त्रपुटकान्वायकस्तु १०१

तुवायविशेषःवेषंअलंकारंचैलेयैःवस्त्रमयैःआकल्पैःरूषणैःपर्वणिउत्सवेरुलोकेपरमां
श्रियंवाबजंवऐश्वर्यविस्मृतिंवहंश्रियंवतत्पादवंदेमायअनयायंत्रवायउज्ज्वादायरजकवधेनवा
यकानुग्रहेणायुवयोविषमाहष्टिःतयानीश्वरतानाशंकनीयेत्याहनहिवामितिश्चनहेपुत्रुःसम
योरितिअनापितुहृदयंसुहृद्दोरितिजगदात्मनोरितिवरपत्तिप्रेलयत्येवंविज्ञापयनुश्चात्तिप्रेलतन्म
तंज्ञात्वाअन्वयवर्द्धनीवंशोवृद्धिमतीमित्यर्थःअप्रार्थितंश्रीप्रत्ततिकंवरंदत्वाततोनिर्जगामेतिस्वैरं
वरनूमधुपुरेरजकंनिहत्यलक्षःप्रदायवरानथवायकायमालाकृतंसमनुकंप्यचकारकुब्जां
कृष्णंधनुर्ध्वसत्सान्विनमनूबन्तंग॥इतिदशमेएकचत्वारिंशोध्यायः॥ ॥द्विचत्वारिंशकेकुब्जो
न्नमनंधनुषोभिदावधस्तत्पक्षिणांकंसारिष्टंरंगोत्सवादिवाअंगविलेपाश्चंदनादयःगृहीतान्यंग
विलेपभाजनानियययासातांरूपसंपदःसुखप्रदंकृंअंगनेहेवरोरुइतिसोपहासंसंबोधयति
कांएवंतदनुलेपनंकस्यवाउत्रमतिनिपातोन्नूविक्षेपयुक्तेवितर्केअस्मत्सेवासद्यःफलेत्याह
नचिरादितितिस्त्रःग्रीवोरःकट्योवक्राचतित्रिवक्रेतिनामयस्याःसाअनुलेपसाधनक्रियायांक
स्प॰ सस्यबकुमतादौस्वपंवांगसौष्ठवंपेवालंवसौकुमार्यंमाधुर्यंचरसिकताहसितंव

आज्ञाप्रष्ठवीद्धितंत्वंतैधर्षितात्मामोहितविज्ञासांडंघनंस्वर्णेतिरवोत्तिनारामहस्तयोर्व
णोत्थूमितर:पीतादिवर्स्त:तेनवोत्तितुंवीजैयस्यतेनसंप्राप्तेपरोनानेरूपरितनोनागोयेनसंप्रा
प्त:परनाग:वोनातिशयोयेनेतिवात्तिनानुरंजितौस्वदर्शनेसद्य:फलंदर्शयनेतस्या:प्रपदेपा
दाग्रद्वयंपश्चामापीड्यद्वेअंगुल्याबुत्तानितनतयस्मिन्नूर्द्धपाणौतेन विलुकेमुखस्याधोनागे
हत्वा ध्यातंदेहं तन्नमयामासतदैवस्तनुसमानमंगंयस्या:हत्यौश्रोणीपयोधरौवयस्या:
सान्तुकुंदस्पर्शनादितिमुख्यंकारणं आधिविकर्षणं मन:पीडाशमनंकंसवधेनसाधित:अर्थःसु
हृदांपयोजनंयेनस:अगृहाणांअकृतागारीणांपांथानांप्रवासिनांपरमयनमाश्रयस्त्वंमधु
रयागिरातांप्रस्थापयव्रजनंवणिग्भिरर्चित:जेरव्याश्चित्रंन्यस्ताइवमूर्त्तयोयासांता:धन्त्रमेखलाला
हत्वनूनिमिषेणअतिदीर्घं मदकरीमत्तहस्तीगच्छतांवध्यतामितिवदंतोजिघृक्षवआवृत्तवंत:नके
वलंकृशौकिंतुनग्नस्यधनुष्प:शाकलेगृहीत्वाजघ्नतुश्चेतिपरत:प्रातर्गंतव्यमितिशालाकुरवा
देवकुलनिष्क्रम्य तेज:प्रजावंप्रागच्छंतंहष्टतांशाकटंशाकटावमोचनस्थानंमुकुंदस्यवि १०२
गमेव्रजान्निर्गमनसमयेयाआशिष:आशासतस्तुखंप्रजातारजनीयंअघध्वंतत्रहशोनवि

ष्यतइत्यादिउक्तवत्य:कृतास्तस्याबन्धवु:पुरुषरत्नपणेस्यश्रीकृष्णस्यगात्रस्यदेहस्यलक्ष्मीश्च
शोभां कथंभूतस्यगात्रस्यनुअरोहइतरानब्रह्मादीनूक्तिवायुत अयनं आश्रयं श्रीकामया
मासयंगात्रलक्ष्मीमितिवाअवनिक्तंकालितमंघ्रियुगलंययोस्तौक्षीरमिश्रमन्नंतुल्कासुखंन्य
वसतांपरंकेवलंगोविंदरामयोर्विक्रीडितंततूनन्तुपराक्रम:कश्चित्‌उज्जयथास्वप्नजा
गरितन्नेदेनप्रत्येकंमहत्वोदौत्यकराणिवातथावमंच:इच्छादुल्लकर्पाआपेतुहिरिण्पादौ त५
ऽयोमुख:रक्तसांदूतआगतइत्यादितथायदेतदद्भुतान्यन्वादेवीवावंवदसीत्यादिनि
श्चितानिदर्शयतिश्लोकत्रयेणोजलादौप्रतिरूपेदृश्यमानेपिस्वशिरस्तत्रादर्शनंध्रु
सत्यपिद्वितीयवस्तुषांतधनिंगुल्यादोज्योतिषांचंद्रादीनांद्वित्वंछायायांप्रतिबिंबेछिद्रप्रतीति:
पिहितकर्णपुटस्ययांत:श्रूयमाणोध्वनि:सप्राणघोष:तस्याश्रवणंधृतेष्टुस्वलेविलोप्रतीति:
रज:कर्दमादिषुस्वपदानामदर्शनं एतानिजागरितेदुर्निमित्तानिस्वप्नान्याहस्वप्नइतिप्रतै:
न्तै:परिधिंग:शीरमारुह्ययानं विषस्यनद्यांनलदमालाजपापुष्कमालापापादितियत
तदप्येकंदुर्निमित्तमितिकष्टेनकथंविस्मृतायांपुन:सूर्येवाप्च:सन्धितइतितथाचस्कृति:य

उदगान्महतोर्वाद्धिश्चिराच्छ्वसमानः सलिलस्य मध्यात् सम्ममार्ष्टपञ्चोलोहिताक्षः सूर्य्यो विपश्चिन्म
न साधुन इतिपद्योपज्ञोपयथाश्रुतं मल्लताल उत्तन उपरिष्टे श्रूयते ये श्रुतेश्रुत्वये स्तुवन्त
पाध्यायाः मल्लाचार्याः उपस्थानं मल्लरंगं समाहूताः समाहूताः निवेदितान्युपायनानि येस्तै॥
इतिदशमे द्विचत्वारिंशोध्यायः॥ ॥ त्रिचत्वारिंशके हत्वा गजेंद्रं रामकृष्णयोः रंगप्रवेशसौमा
र्ग्यं चाणूरेणाथ जल्पितं॥ पूर्वं चुरेवक्तं तवोवं शुद्धं त्वं निरपराध त्वं यथा स्यां तौ एतदुक्तं भवति धनु
र्भंगादिना आवाभ्यां निजेश्च येस्तु वित्ते पिपितरो न तं हंति आवां वसुनाजिघांसति अतस्य मा
तुलस्यापि वधे नावयोर्दोषः इत्येवं कृतापराधपरिहारावितिमल्लानां दुंदुभीनां च निर्घोषं मल्ल
तालदुंदुभिनिर्घोषं वा श्रुत्वा कृष्णो हस्तिपस्तेन प्रबोदितं परिकरं युद्धोचितं परिधानं कृत्वा समस्तुचनि
बध्य अंताः को मत्य कालस्तन्निमित्तं यमस्तन्नियंता तैः रूपमायस्य तं विगलितो विद्युतः मुष्टिना
निहत्या लीयत अदृश्योवभूव अथ कर्णः अपश्यन् घ्राणमवघ्राणं तेन दृष्टिर्दर्शनं यस्य सः लो १०२
चनागोचरमपि हि पशुबोधघ्राणेन जानंतीति प्रसिद्धं परामृशत् स्पृष्टवान् पुष्करेण शुंडादण्डाग्रे
णः सः कृष्णः प्रसह्य बलेन धनुषां पंचविंशतिर्यावतत्ता वंतं देशं गजं विकर्षं आकृष्यनीतवान्

कं कइव विकर्ष यथा नागं सर्पं वर्द्धमानं गरुडः सुपर्ण इव स्वयमिति आविशसी घय्या
पाश्यां दिशीं दुरिव पुष्कल इति वत् स पर्यावर्त्तमानेनेति पुच्छग्रहणं कृष्णं गृहीतुं य
दि दक्षिणतः परिवर्त्तते गजः तर्हि सव्यतो भ्रामयति यदा सव्यतः परिवर्त्तते तदा दक्षिण
तो भ्रामयंस्तेन सदृशं भ्रामं गोवत्सेन भ्राम्यमाणेन बालकः स एव कृष्णो यथा अन्यो
वा बालक इवेति वारणं गजं प्राद्रवन् प्रकर्षेण समंततो धावन् पातयामास स यथा पत
त्ति तथा तं वंचयन् प्राद्रवदित्यर्थः किं वा स धावन्निति आहन्तन्तु आहत्य नरंगं समाविशत्
तदा वीरश्रियावृतो कृष्णः तु ततः अंसे न्यस्तं विशा सैंगजदंतोयेन सः अस्त्रजः रक्तस्य
मदस्य च बिंदुभिः परितोंकितः विरूढाः उद्गताः स्वेदकणिकाः ता भिस्पलदितं वदनांबु
रुहं यस्य सः न केवलं स एकः समाविशत् किंतु वृत्तोगोपैरितित त्र वश्रृंगारादि सर्वरस
कदंबमूर्त्तिनिंगवांस्तत्तदभिप्रायानुसारेण बभौ न साकल्येन सर्वेषामित्याह मल्लाना
मिति मल्लादीनां दशानां दृष्टृणां मत्वान्यादिरूपेण दशधा विदितः सन्साग्रजो रंगंग ग॰

मा·द·सू·टी·

तस्यान्वयः।महत्त्वादिग्भित्तिव्यापकस्साऽक्रमेणाऽस्मिँल्लोके ननिबध्यं तैरैरोमुत्थश्शृंगारोत्तास्यं
वीरोदयात्तथान्नयानकश्चबीभत्सः शांतःसप्रेमभक्तिकः। अविदुषां विराट् विकलः अपर्या
प्तोराज्ञत इतितथा अनेनबीभत्स उक्तः विकलत्वं चक्रवत्संसारस्सर्वांगावित्यादिना वक्ष्य
ति। बुद्धि विजेनीतोबभूव यथान दावितिनिर्णयस्यैवं दर्शितं प्रकृष्टवेगेनोत्कवितानि
उक्तं जितानि ईक्षणानि आननानि वयेषां ते तयोराननं पद्मःपूर्वं नत्तुच्छमाःनिराकां
क्षानबभूवु रित्यर्थः तदेवाहपिबंतइवेति श्लिष्यंतःपरिष्वंगं कुर्वंत इवलक्षिता इत्यर्थः
यथादृष्टधनुर्भंगादियथाक्रमंगोवर्धनोद्धरणादि तत्तदनतिक्रम्यतदनुरूपमित्यर्थः।
प्रत्यक्षंवतयोरूपं गजदंतादियुक्तं गुणाः शौर्यादयः माधुर्यं स्मितालापादिवि
गधाश्चर्तिः स्मारिता इवस्मरणं प्रापिता एव विस्मिता नां वाक्यान्याह अपृच्छन्निः एव
तावित्यादिभिः किंपेतिसर्वत्रान्वयः मुष्टिकः शारवचूडः अन्येधासुरादयः आश्रमं वा
इषदृष्ट मयुक्तं मुरवं अश्रमं मुरवमितिवा यद्वा अश्रमं यथा भवतितथा तरंतिस्मेति १०४

मू५ अनेनपरिरक्षितोयदीदोर्वैराः सुबन्धुविक्षतः संतृप्ताः इति पृष्टस्ते इतिवदंतीति धेनुकबक
वत्सासुरेषु विपर्यासिर्जनवादेष्वनिश्चयात् जनेष्वेवं कृपाणे युतदसत्माना श्वाणस्त
भवीदिति हे कृष्णं प्रियंकरवामेतिराज्ञिभीतेभूतानिप्रसीदयुः यथोविततं नियुद्धबाहु
युद्धं भवेत् मल्लस्यमादसः मध्यस्तमाधिक्रुता नूनं अधर्मोमास्यन्नोदिल्ये तदर्थी हे महत्वेतिवांस
हस्तिक्षिपानांसत्त्वं बलं बिभर्तीतितथा बलिभिमीदृशैः सहत्रनयोः अधर्मः विक्रमं पराक्रमं
मू५ कुरुःमुष्टिकोविक्रांतादिति।। चत्वारिंशतितमोध्यायः।।चतुश्चत्वारिंशेकेतुमल्लकंसादिमर्द
स५ नं कृष्णोपि समाश्रित्तान्यां पितृभ्योद्दर्शनं चचितः निश्चित स्वसंकल्पएववयस्यसः बा
हुमध्याक्रनिष्पुं गुलिव्यतिरेकेणाकृतमुष्टिर्हस्तौधरतिः परिक्रामणं हस्तादिभ्रमणं गत्वाग्रहीत्
वापरितश्चालनं।विक्षेपोनोदनं परिरंभोवाहुभ्यां निष्पीडनं अवपातनं अधक्षेपः ऊ
त्सर्पोणोत्सृज्य पुरतोगमनं अपसर्पणं पृष्ठतोगमनं एतैः प्रत्यंसुस्थितां पत्याहृतवंत।
उच्छापनं पादौजानुनीचस्थौपिंडीकृत्यपतितस्योच्चाटनं उन्नयनं हस्ताभ्यांकुलनयनं।

स५ न्मा१

क्र२ नादपदी

बालनं कंठादि जग्नस्य निःसाराणां स्थापनं पाणिपादादि पिंडीकरणं एवं परस्य संभ्र
मनोदेहस्यापर्वेतुः अपकारं कृतवंतौ तद्धरुं बलाबलवत् एकतो बलमन्यतोऽबलं
तद्धरुं विषममिव्यासुरित्यर्थः तदेवदर्शयति महानितियद्वा तद्वाबलवतोर्युद्धं
दृष्ट्वा महानयमधर्म इत्यहुत्वच्चयः बालयोबलिवतोश्च युद्धं राज्ञेत्पश्येच्च यं वारणीयः ज्ञाध
सा एतेनुराज्ञःपश्यतःस्वयमप्यचिकृंति अन्ये मन्यंत इति महानधर्म इत्यर्थः बलाबलव
वत्रेराणि तयुद्धतां प्रपंचयति पंक्तिः केति वैज्ञवल्कमिना निसर्वांगाः नियंयोः समाजस्यसत्ता
५ याः अराउद्धः नसत्तामिति अर्जुवन् ज्ञात्वापि रक्षीतिष्ठन् विज्ञुवन् विपरीतं ब्रुव
न् अज्ञःन ज्ञानामीति ब्रुवन् अतः प्राज्ञः सन्नां न प्रविशेत् वज्जातेः राजुमन्नितः इति
राज्ञोः सर्वतोधावतः कृष्णस्यश्रमवारिणा उर्वंत्याधंवदनांबुजं दृश्यतां अन्या ऊचुः
किं नपश्यतेति सामर्षसक्रोधं हासेन संरंभः आवेशः तेनयो जनं अन्या ऊचुः पुण्या १०५
वतेति नृलिंगेन मनुष्यदेहेन गूढः वनस्थानि विचित्राणि माल्यानि यस्य सः गि.रित्रः वि

वः रमार्चितात्याम चितावंघ्री यस्य सः अयं नायः धिगिमां सन्नां यस्यामयं परात्त्यतेल
क्षः व्रजस्तु वोधन्याः यत् यासु अयं कृष्णो विविधया क्रीडया वनितिगच्छतीति अतो कष्टमच्य
पुण्यावयं यतोऽस्मात्तिरनवसरे दृष्ट्वा यं गोप्यरक्षः बहुपुण्या इत्याहुः स्त्रितिः अगुष्यक
क्षः स्वरूपं अंगलावण्येन साररुत्रेष्ठं किंच असमोर्ध्वं न्याक्षि समं ऊर्ध्वं मधिकं च यस्यत
त्तं तदपि नान्येन आभरणादिना सिद्धं किंतु स्वत एव ऐश्वर्यस्य एकांतधाम ऐश्वर्यस्य
वश्चत्रिचारिस्थानं एवंभूतं नित्यनवीनं रूपं या नेत्रैः पश्यंतीति किंचदोहनादिषु
नंगायंतितिता। व्रजस्त्रियो धन्याः प्रेंखेंखनं दोलांदोलनं उक्षणं सेचनं कथं भूताः उ
रुक्रमे वित्तं उरुक्रमवित्तं तेनैव यानं सर्वविषयप्राप्तिर्यासां ताः पाठांतरे उरुक्रमं
चिंतयंत्य इत्यर्थः कुतः अनुरक्तधियः तत्र लिंगं अश्रुकंठ्यः अपि च प्रातरिति या आ
बला अस्य वेणुं निशम्य गच्छतः तां निर्गम्य पथि सायं च तं सायं स्वं पश्यंतितातारिपुण्या
इति एवं सत्त्वयं ब्रुवाणासु स्त्रीषु तासां नयनिवृत्तये कृष्णः शत्रुं हंतुं मनश्चक्रे समया
स्त्रीणां गिरः श्रुत्वा पुत्रयोः स्नेहेन याश्च कृतया आतुरौ विकलौ पुत्रयोर्बलमजानंतौ

क्ष२

बालनंकंठादिकुनस्यनिःसारणंस्थापनंपाणिपादादिपिंडीकरणंएवंपरस्यस्वा नादपदी
त्मनोदेहस्यापर्वंतुःअपकारंकृतवंतौतद्धद्वंबलाबलवत्एकतोबलमन्यतोऽबलं
तद्धत्तंविघममित्याहुरित्यर्थःतदेवदर्शयन्नीयतिमहानितियद्यातद्धाबलवतोर्युद्धं
दृष्ट्वामहानयमधर्मइत्यूत्तत्यन्वयःबालयोबलिवतोश्चयुद्धंराज्ञेत्यरयेत्वयंवारणीयः जाध
एतेनुराज्ञःपरयलःस्वयमप्यत्विकुंतिअन्नमन्यंतइतिमहानधर्मइत्यर्थःबलाबलव
सा वक्रराणि तयुद्धतांप्रपंवयतिपंक्तिःकेतिर्वैव्रवकमिनानिसवींगाऽनियोःसमाजस्यसत्ता
५ याःअराऊहुःनसत्तामितिअर्द्धंब्रुवन्ज्ञात्वापितूष्णीतिष्ठन्विब्रुवन्विपरीतंब्रुव
न्अज्ञःनज्ञानामीतिब्रुवन्अतःप्राज्ञःसनोनप्रविशेत्वज्ञातःराज्ञमनितःइति
राज्ञोःसर्वतोधावतःकृष्णस्यप्रमवारिणाउग्रंव्याघ्रंवदनांबुजंदृश्यतांअन्याऊहुः
किंनपश्यतेतिसामर्षसक्रोधंहासेनसंरंभःआवेशःतेननोजनंअन्याऊहुःपुष्पा १०५
वतेतिहलिंगेनमन्तुघादेहेनगरुढःवनस्थानिविनाणिमाल्यानियस्यसःगिरिःवि

वःरमावंतात्यामविंतावंधीयस्यसःअयंनाथःधिगिमांसत्तांयस्यामयंपरात्त्यतेल
स्तःव्रजत्त्ववोधन्याःयत्पाङ्कअयंकृष्णोविविधयाक्रीडयांचतिगच्छतीतिअक्तोकष्टमव्य
युण्यावयंयतोऽस्मात्तिरनवसरेदृष्टोयंगोपस्तःबडूपुण्याइत्याहुःस्त्रियःअनुषस्क
क्षास्यरूपंअंगलावण्येनसारंश्रेष्ठंकिंवअसमोर्ध्वंनास्तिसमंऊर्ध्वंमधिकंचयस्यत
तूतदपिनान्येनआनरणादिनासिद्धंकिंतुस्वतएवएश्वरस्यएकांतधामएश्वर्यस्य
वअध्यनिवारिस्थानंएवंभूतंनित्यनवीनंरूपंयानेत्रैःपश्यंतीतिकिंतदोहनादिघो
नंगायंतिता।व्रजस्त्रियोधन्याःप्रेंखेंखनंदोलांदोलनंउद्धाणंसेचनंकथंत्त्ताःउ
रुक्रमेवित्तंउरुक्रमवित्तंतेनैवयानंसर्वविषयप्राप्तियासांताःपाठांतरेउरुक्रमं
वितंयांताइत्यर्थःऊतःअनुरक्तधियःतत्रलिंगंअश्रुकंठ्यःअपिवपालरितियाअ
बलाअस्यवेणुंनिरास्यगरूतात्तांनिर्गम्यपश्चिसास्मितंस्वंपश्यंतिताःनरिष्ठएपा
इतिएवंसत्त्वयंब्रुवाणासुस्त्रीषुतासांजयनिवृत्तयेकृष्णःरात्रुंहंतुंमनश्चक्रेसजयाः
स्त्रीणांगिरःश्रुत्वापुत्रयोःस्नेहेनयाश्चकूतयाआतुरौविकलौपुत्रयोर्बलमजानंतौ

पितरावन्तुतापं प्राप्ताविति तदा भगवतो गात्राणां अरत्निजान्वादीनां निपातैः प्रहारैः वज्रस्य निष्पेषः ती
व्रप्रपातः तद्वन्निष्ठुरैः मथ्यमानांगः श्लथयज्ञात्रः स्वपेनस्येव वेगो यस्य सः चाणूरः अबाधत अताड्यत्त
त्पृष्ठे तु वउपरिपोथयामास आस्फालयत् इंद्रध्वजो नग्रं पद्मइंद्रध्वजो नाम गौडेषु प्रसिद्धः कस्मिंश्चि
दुत्सवे महता यत्नेनोद्ध्वजपताकाद्युपेतं कृतः पुरुषाकृतिस्तु क्रीयते स यथा पततीति अर्दितः पीडितः अवयुपं
त्तले वलांतो नृत्यादिषु कुर्वंतौ साधु साध्विति वदंतः अव्ययः अश्रमः लघिम्ना लाघवेन दुर्विषह
अविषह्यमुष्यंतेजो यस्य सश्री कृ[illegible]
त्तः गरिष्ठलाय विध्वस्यपलमुक्तं तत्तत्वेन क्रष्णुनानः अतस्तस्यापर्येवपपात यत आमितंत्रः स्वतंत्रः
निर्वेद्यो निःकृतिः आनृण्यमित्यर्थः तेकारिणः संतस्ते स्वपक्षवनुतथाद्दगतिरजसो वेगो येषां तान्
संयत्तानुद्धृत्तानुद्धृत्वोवंत्यो विलापन्नकुः प्रवः अप्रिप्रधर्मज्ञेत्यादीनि विलापे प्रेमसंबोधनानि
अनागसामिति तु परमार्थाभिधानं ते वदीयावयं त्वयापत्या विरहिताः पुरीयं नगरी न तत इति स्व
इष्टात्तिधानं एषकृष्णः प्रतवंत्य आदितिपत्तवः अपियंत्यस्मिन्नित्यप्ययः स्वस्वं तदवष्टानं आ
वज्ञातक चैवशीलं यस्य सः आस्वस्यपदेष्युप्य पुत्र चांति विप्रायजगदीश्वराविति ज्ञात्वा रांकितौ १०६
संतौ न सस्वजाते नालिंगितवंतौ किंतु बद्धांजली तस्थतुरित्यर्थः प्रसह्यत्वात्तत्स्तांडिमद्यन्नजी

नयां बीत्तस्तवरितं कंसंसवीनस्सममारयतु ॥ इति दशमे चतुश्चत्वारिंशतितमोध्यायः ॥ ॥ पंचच
त्वारिंशके थपित्रनंदादिसांत्वनं । उग्रसेनाभिषेकश्च गुरौ वासो गुरागमः । उपलब्धार्थौ विदि
त्वेति अयमर्थः उपसमीपे आवयोः पुत्रबुद्ध्या सांसारिकपरमसुखभोगात्पूर्वमेव लब्धार्थौ ले
ब्धआदामीश्वराविति प्राप्तपरमज्ञानरूपार्थौ याम्यां तथा भूतौ तौ ज्ञात्वा मयि प्रसन्ने सति अ
नयोर्ज्ञानं नाम किं दुर्लभं स्यात् दुर्लभं मयि पुत्रतया प्रेम अतस्तदानीमेव तद्धानं मायादि निज
स्वाधीनां मायां तयोः प्रसारितवानिति तदेव दर्शयति उवाचेत्यादि निरुष्टाः प्रीणानुप्रीणय
न् सादरं ब्रुवन् अस्मत्तः अस्मन्निमित्तं नित्यमुत्कंठितयोरपि युवयोः पुत्राभ्यां कृत्वा बा
ल्यपौगंडकैशोराः तत्तदवस्थानुभवसुखरवानीत्यर्थः नाभवन्निति अस्मत्तः पुत्राभ्यामिति
सामानाधिकरण्येन वा किंच आवामेव देवहीना वित्यादि न लब्ध इति पितृगेहस्थावालायां तु
दं विंदंति सा च न लब्धेति एवं तावत् श्लोकद्वयेन युवयोः आवयोश्च कामहानिर्जातीत्युक्तं आव
योः पुनर्युष्मत्परिचर्यालोपेन धर्महानिरपि जातेत्याह सर्वार्थसंभव इति सर्वे धर्मार्थकामाः मोक्षयो
नां संभवो यस्मिन्सः देहः यतो याभ्यां जनितः तयोः पित्रोः निर्वेशं निष्कृतिमानृण्यमपि प्रेमप्रीत्यै रा

तसंवत्सरमात्रेणायुषानप्राप्नोति तन्मध्ये पित्रोर्यः पुत्रः कल्यः समर्थः सन्नपि देहेन धनेन
च पित्रोर्वृत्तिं जीविकां न संपादयेत् तं प्रेत्य लोकांतरे यमदूताः स्वस्यैव मांसं खादयंतीति हीति
किंच मातादिभरणस्य महत्त्वं कुर्वन्नविफलं जीवितस्य नयतीत्याह मातरमिति अबिभ्रदपुष्णन्
ह्यसन्नपि मृततुल्य एवेति तत्तस्मान्नो आवयोर्मोघं व्यर्थं अनवर्ततोऽपूजयतो दुर्हृदा कंसे
न कृत्वा आश्वास्य सांत्वयित्वा च मेवाज्ञापयेति मा वदेत्याह यातिनायादिति तवतु यादव
त्वेपि मदात्तया न दोष इति भावः मम तादृशी शक्तिर्नास्तीति तत्राहमेत्यायीति मित्रसंदेन
सर्वं न विष्यतीत्यर्थः स्वानुज्ञाती नसंबंधोऽस्य दिग्न्यास... नाय्येति सिद्धा... कृत्सरामा आ७
पो६ न्याणतो निवृत्ताक्षरस्तोयेषां तेसदयस्मितं वीक्षणांयस्मिन् ततत्र पवयसो वृद्धा अपि
अतिशयितं बलमोजश्च येषां तेन्त्रां आत्मनो पार्थिकोप्रीतिरिति देवकीवसुदेवयोः त्रि९
पुत्रौ [illegible] युवां नास्मत्पुत्राविति अपि न वा यामित्याह सपितेति स व्रजं व्रजवासिनि
सहितं ४ कृपानिचतोरिजतातिरिक्तकांस्यादीपात्रादीनि ततिः पुरोधसा गर्गाचार्येणाधि १०७
गसंस्कृतिरुपनयनं गावो गाः रुक्मस्य मालाविद्यैया सांताः क्षौम[illegible]वस्त्रमालावतीः ते२
= क्षिक्येन पोषितौ नाश्चर्यमेतदित्यात् पित्रोरिति आत्मनोदेता मजेष ४

वृ१
याएमनोदत्ता आसन् ताएवदा[illegible]तंननु ताः कं सेनापहृताः सत्यां राजगोष्ठादाक्षिण्य
दत्ताइत्यार्थः कंसेनाधर्मेतइति गायत्रं व्रतं ब्रह्मचर्यं प्रकर्षेण नवंत्या न्यामिति प्रज्ञवौ
अतएवसर्वज्ञौ स्वतः सिद्धममलं ज्ञानं प्रच्छादयंतौ नरचेष्टितैः यथायथावत् उपसाद्य
उपप्राप्य गुरौ वृत्तिमन्यानूपाहरयंतौ शिक्षयंतौ गुरुमुपेतौ उपगतौ सेवितवंता विश्व
र्थः गुरुत्ता वीयास्तुतानिरन्तुवृत्तिभिः सांगोपानिषदः अंगानि शिक्षादीनि ते
पनिषद्भिश्च सहितान् सरहस्यं मंत्रदेवताज्ञानसहितं धर्मान् धर्मशास्त्राणि न्याय मन्वादि५
पथान् मीमांसादीन् आन्वीक्षिकीं तर्कविद्यां षड्विधां संधिविग्रहयानं आसनं द्वैधं
आश्रय इति एवं षड्भेदां राजनीतिं सकृत् निगमैः दमात्रेण एकवारं गुरोरुच्चारणमा
त्रेण तावतीः चतुःषष्टिकलाः अंदया मासत्रु उपलोजितवंतौ प्रज्ञासत्रे दोभरणावि
न्द्रतं बालं वरया मासर्दश्वराविति विदित्वा सत्वदत्तयोरहारमानहार पंचजनस्तु
शेऽकार्षीत् सर्वमहानुभमासाधाइत्यर्थः सपर्यां पूजां सर्वेषां भूतानां आशयाः अंतः
कराणानि तान्यालयो निवासो यस्य तं निजं कर्मनिबंधनं यस्मात् तथाभूतमपि मदात्मा

उरस्कारेणानयतस्तव नदोषइत्यर्थः वृक्षेति प्राधान्येनैकस्यसंबोधनं गुरोर्निग्रहयोगु
रुदक्षिणा युष्मविधयोर्गुरो मम कामानां मध्ये कोनु कामो ध्वनिष्यत्तेन कोपीति कृत्वा ग्रैश्वामि
लवइंद्रत्तयस्यत्तेन पर्जन्यो मेघस्तद्ध्वनिनदोयस्यत्तेन नष्टं अदृष्टं तत्कुन लेख्यंधनं याति स्ताव
वेति। इतिदशमेपंचचत्वारिंशोऽध्यायः॥ ॥षट्चत्वारिंशके घोषं कृष्णः प्रेषयतोद्धवं यशोदा
नंदयोश्चक्रे कृष्णः शोकापनोदनं॥ कामचारं द्विजातिसन्नृपपरित्यज्यातिसंयतः गुरोर्ज्ञा
न मनुप्राप्य सख्या गोपीरूपादिश्यात् गोपीसांत्वन मतिरत्रस्यं सन्मं त्रिसाध्यमितितदर्थ
मुद्धवं विज्ञानपि वृष्णीनामिति बुद्धिसत्तमः बुद्ध्यातिश्रेष्ठः गोपीनां विशेषतः संदेशं कारणा
माहताइति मय्येवसंकल्प्यात्मकमनो यासांताः अतएवप्राणो यासांताः मदर्थे त्यक्ताः देहिष
काः पतिपुत्रादयो याभिः ताः ततः किमत आह येत्यक्तलोकधर्माइति मन्निमित्तं त्यक्तो लोकधर्मो
इहामुत्र सुखं चैतत्साधनानि च यैस्तान् बिभर्मि संवर्धयामि सुखयामीत्यर्थः तासां वियोगाधिं दर्श
यति ह्यये न मयि ताइति विरहेणाय दौत्कंठ्यं तेन विह्वलाः परवशाः गोकुलान्निर्गमसमये शीघ्रमा १०८
गमिष्यामीति ये प्रत्यागमनसंदेशास्तैः मम दीयाः वल्लव्यो गोप्यः मदात्मिकाइति तासामात्मा स्व

देहत्यदिस्यात्तर्हि विरहतापेन दह्येतैवं मयि वर्तमान लोकथं विज्जीवंतीति भावः संदेशं
नवतीनां वियोगामेनदिसर्वात्मनाक्षविदित्यादिकं निन्नोवति अस्तंगच्छति साति छन्नं या
नं यस्यति तदा गोपी ज्ञिरज्ञातत्वेन नंदसंगं लब्धवानिति स्तूयति व्रजं वायियतिपंचनिःश्वा
सिताद्य इत्यादिनिःश्वासिताः मुष्णवत्यो गावस्तन्निमित्तं मिति तो युध्यद्भिः शुष्मिभिर्मत्तैर्गो
वृषैनादितं धास्नां निर्धेन्विभिः वत्सकान्प्रति विलंघद्भिः उत्पतद्भिः गोदोहशब्दैः सह अभितोय
वाः सुवं मामुंचनये आनयं देहदिग्दृक्ष्णेत्यादयायस्मिं स्तत् वेणूनां निस्वनेन वर्णायंतीति
गोपीनां पिष्कस्तु क्षिराजितं अम्नाद्यर्वनान्वितैर्गोपिगस्वैधूपादिभिश्च मनोरमं स्वडं सम्यक्
यप आचेतुपूजयामास स्ताधूनामिति कर्मणि षष्ठी गावो गाः गिरिं गोवर्धनं अप्यायास्यति श्रीका
ति गमिष्यौ किं श्रीकृष्णोपकारस्मरणादि निरुपमानंदेनाभिन्दूयमान आतदावाग्नेरित्यादिना
वाताद्दर्षाद्वितिवृषात्सर्पाद्वेति अन्येभ्यश्च तु रतिक्रमसः ओमेत्युक्तः श्रीकृष्णेन रक्षिताः स्मः किंवस्मर
ताभितिलीलया अपांगेननिरीक्षितं अंगरुह उद्धवनकेवलं शिथिला एव किंतु सानेरूपरमंतीत्याह स
रिक्केलेति सरितस्य शैलाश्चवनोद्देशास्तान् आक्रीडान् क्रीडास्थानानि स्तुराणा मयायमकृत

गंभीरंगंभीरस्य वचनं यथा न केवलं तद्वचनानुसारेणैव अवतारसंवादादपीत्याह कंसमिति ॥
नराद्यष्टिमिव तालत्रयप्रमाणं धनुर्बभंज अखिलगुरुत्वमेव जनकत्वेन नियंतृत्वेन चाहर
तावितिरामो मुकुंदश्चैतौ विश्वस्य बीजयोनी निमित्तोपादाने ननु प्रकृतिप्रधानयोर्बीजयोनित्वं
९४ प्रसिद्धमत आह पुरुषः प्रधानमिति पुरुषो वा प्रधानं वा शक्तिः अतः प्रधानपुरुषावप्येतावेवेत्य-
र्थः एवं जनकत्वमुक्त्वा किंचान्वीय भूतेषु भूतेष्वनुप्रविश्य भूतानां च तदुपहितस्य विलक्षण
स्य नानाभेदस्य ज्ञानस्य च जीवस्य ईशाते ईश्वरौ नियंतारौ भवतः अतः पुराणौ अनादी अ
नादित्वात्कारणत्वं ततश्च निनियंतृत्वमित्यर्थः ननु सृष्ट्यादिकर्मविधाननुष्ठानादिजन्मदर्शना
च्च तस्यान्यस्मात्कोविशेष इत्याशंक्याह दृष्ट्येन यस्मिन्निति कर्माशयं कर्मवासनां निर्दह्य दग्ध्वा
बलमयः स्वरूपज्ञानवान् अर्कवह्निः शुद्धिसत्वमूर्तिः सन् परां गतिं तत्पदं याति अखिलस्या
त्मा च हेतुश्च तस्मिन् कारणेन मनुष्याकृतौ महात्मन परिपूर्णौ भवंतौ नतिं करुतं अतः कृत
कृत्यावित्यर्थः प्रस्तुतमाह आगमिष्यतीति पितरौ युवयोः यातयूयं व जंतात वयं वसने दुःखिता १०९
नूज्ञाती नोऽद्धृष्टमिच्छामो विहायस्तु हृदंसुखमिति यदाह कंसः तत्सत्यं करिष्यतीति कालविलंब

मसहमानो भवत्याह मा खिद्यतमिति मत्ता गौअंतिके इदानीमेव समीपे वा अतः इत्यत आ
ह अंतर्हृदीति तद्धि सर्वैः किमिति न दृश्यते तत्राह ज्योतिरिवैधसीति तद्यथा मथनं विना न दृश्य
ते तथा भक्तिं विना कृष्णोपीति भावः अतो आस्ता मे ततुलस्य च चित्तागमनं स्वस्याति प्रियान्पि
त्रादीन् विहाय न संग इतत्र इति मन्येतत त्राह नह्यस्येति अस्य प्रियादयो न हि संतीति तत्र हेतुः अ
मानिनः समानस्येति च सोपि जन्मकर्मादिरहितोपि क्रीडाप्रयोजनस्सन् साधूनां परिपाल
नाय सदसन्मिश्रयोनिषु सात्त्विकतामसराजसयोनिषु यद्वा देवादिमत्स्यादिनृसिंहादियो
निषु कल्पते आविर्भवतीत्यर्थः ननु जन्मकर्मादिरहितस्य कुत एतदित्यत आह सत्वमिति क्री
डामतीतोपि क्रीडनं तथापि मायागुणैर्घटितं इत्यर्थः अत्रापि अविद्योपाधेर्जीवस्य कर्तृत्वं दृष्टं
तीकुर्वंस्तस्याविद्ययैव कर्तृत्वमिति स दृष्टांतं माहरथेति भ्रमरिकाभ्रमणं तयोपलक्षितस्य
दृष्टांत्मपि भ्राम्यतीति यथा प्रतीयते एवं चित्ते कर्तरि सति तेन चित्ते अहंधिया आत्माध्यासे
न आत्मा कर्ता स्मृतो यथा तद्वदिति किंच युवयोरेव नायमात्मजः किंतु सर्वेषामपि तथापि
नात्मज एव किं तु रात्मि त्रादिरूपोपीतिसावित्य निरूपणेन मोहनिवृत्तये संबंधमे

ना·द·पू·

नैकांतिकीकरोतियुवयोरेवेतिद्यान्यां अप्यकृतादिनांतरांनितरांतत्वतोवाच्यंनिर्विवूनादि
वस्कृ नास्तीतिदीपान्निरूप्यपञ्चाल्यंवास्तनूदेत्यादीनूप्रमाणितिःकांचादिप्रुक्तितैःरंजु
विकर्षस्तुतुजेप्युर्ककणानांस्नडोयासांताःचलंतोनितंबाःस्तनात्तमाश्वयासांताःकुंकु
टलैस्त्विषांलःस्फुरंतःकपोलायासांताअरुणानिकुंकुमानियेषुतानिआननानिया
सांताएवताश्चताश्चतदाव्रजौकसोगोप्यःसक्रोधमाङःअयस्त्वइति।अयंसाधितवानित्य
र्थेसाधनःतदाङःयेनीःनीतइतिंकंसंघातयित्वापुनःकिमर्थमागतइत्याशंक्यकार्यंसंत्वा
वयंतिकिमितितदासाध्वितेनकार्यंणापीतस्यनर्छपाठांतरेप्रेतस्यमृतस्यकंसस्यनि
ष्कृतिमौर्ध्वदैहिकंअस्माभिःकृत्वासाधयिष्यतेअस्मन्मांसैःपिंडानूकृत्वादास्यतीत्य
र्थःएवंवदंतीनांस्त्रीणांततस्मिन्नवसरेकृतस्नानादिनियमउद्धव आगतइति।।इति
दशमेषट्चत्वारिंशतितमोध्यायः।।।।सप्तचत्वारिंशेकेचप्रकाशादर्शनेगोपिकाःबोधयि
त्वोद्धवस्तत्वमन्वशातोगमन्मधुरां अपीत्यंसुंदरंदर्शनीयस्यसः अयंकृतस्यैववेषोत्सवणानि ११०
वयस्यसःकोयंकुतोवाकस्यवेतिवदंत्यस्तंपरिवव्रुःपार्षदंसेवकं।पित्रोःप्रियचिकीर्षये

त३

त्यत्रहेतुःस्नेहानुबंधइति अन्यथागोव्रजेतस्येत्यत्रहेतुःअन्येष्वितिअर्थेकृताकायेनिमित्ताविडं
बनमनुकरणमात्रेणनुतानिकीर्तुनिरितिदृष्टांतोअस्यैवान्यार्थदर्शनैःप्रपंचःनिःस्वमित्यादिनादत्ता
दक्षिणायेनतंयाज्यंपक्षिणोविगफलं वृदांरंतांअनुरतांअटध्यामिति यथाःत्यक्तलौकिकाःत्यक्तलोकव्य
वहाराःप्रियस्यकर्माणिगायंत्यःतथातस्यबाल्यकैशोरयोर्यानिकर्माणितानिसंस्मृत्यगतह्रियःस
खेहृदंकृत्स्नमपृच्छन्निति पूर्वेकियत्येवसंबंधःप्रियेणश्रीकृष्णेनमांप्रसादयितुंप्रस्थापितोयंदूतइति
कल्पयित्वाब्रुवीत्यद्यातस्मिन्प्रियप्रस्थापितउद्धवेदृष्टिंकृत्वामधुकरापदेशेनोद्धवमेवाब्रवीदित्य
र्थः हेमधुपकितवस्यधूर्तस्यबंधोनोअस्माकमंघ्रिंमास्पृशमामांनमस्कारेणप्रार्थयस्वेत्यर्थःतत्कि
मित्यपेक्षायांकृष्णस्यतस्यश्मश्रूणांलोहितविकारणमुत्वेत्तमागिरूसपत्न्याःकुचान्यांविछु
लितासंमर्दितायाकृष्णस्यवनमालाअतएवतस्याःकुंकुमंयेषुतेःश्मश्रुभिरुपलक्षितःकिंतुतासा
मेवमानिनीनांप्रसादंमधुपतिर्वहतुकिमस्मत्प्रसादेनतस्यायदुसदसिविडंब्यंउपहासास्पदंकृ
तःयस्यदूतस्त्वमीदृक्नतुकिमित्येवंतमवजानीथकिंवस्तेनापकृतंअतआहसकृदितिनवात्कृष
चाहृशोदुमेनाःसुमनसःकुसुमानियथात्यजतितद्वतअहोबलाविशःस्यतस्यपादपद्मंश्रीःकथंसेवेत
विदितंमयेत्यात अपिबतेतिखेदेक्तानम्लोकस्याज्जैमिथ्याकथानिःप्रायोहृतचेताःवयंतुनजानी

वदन्विव्रणो इति भावः अंकारान्खङ्गधाङ्गवंतं तमस्मत्प्रसादलाभाय कृष्णं गायती ति मत्वाह
किमिहेति पुराणां पुरातनं बद्धगोत्रमतं सविज्ञ यस्स स्वस्य कृष्णस्य सांप्रतं याः सरखास्तासाम
पत्स्तत्प्रसंगो गीयतां इष्टाः कृष्णस्य प्रियाः चो नप्रजिता वाति नालिंगनतः दोषः पितानुत्वरु कृपासां
ताः तवेष्टमपेक्षितं दास्यंतीति नोमातः मे वंबावः त्वामनुस्मृत्वा नंगविकवस्त्वत्प्रसादयितुं मा
मादिष्टवानिदलतत्राह दिवीति दिवि द्धाविवरसातले भुयाः स्त्रियः यस्युः ताः का नामदुरापाः न
नै१ काप्यनं तदित्यवाच्यं तस्येत्यर्थः कपटेन कृत्रिमेण हासेन विडंनो यस्य तस्य हे कपटेति वा किंच यं
स्य स्वरागारजः श्रीः सेवते तन्नचयं काः अपि नयद्यप्येवं तथापि स्वरूपाणां पश्चात्स्वरूपाणानुकंपि नि पुंसि
उत्तमश्लोक राक्षो नवतीति तया कथनीयं त्वयेति भावः उपादमत्रेषु विरातं तमापयिषां तामि
टी वमत्वा ह रिरसि न्यस्तां पादं विसृजन् तथाप्यमुं वंतमात्व जीतिमुकुंदाद न्येत्यततः सिद्धि त्वेत्य
र्यः दौत्यैः दूतकर्मभिः चाटुकारैः प्रियोक्तिरचनाभिः अनुनयविदुषः प्रार्थनाचतुरस्य ते सर्वोम
हं वेग्नि मुकुंदवत्त्वमप्यविश्वसनीय इति भावः ननु ते न किमपराद्धं तत्राह स्वकृत इति स्वकृततत
दर्थमेव क्लिष्टाः अपत्यपत्यमिलोकाः अपत्यानि पतयश्चेति इहलोकः अन्यलोकाः धर्मसाध्या १११
याभिः स्ताः नः अकृतवेता असंयतवित्ता यो व्यसृजत् अस्मिन् कृष्णे किं ननु संधातव्यमिति किंच
न्यर

कृष्णस्य पूर्वाणि कर्माण्यनुसंदधाना विजिनेम्य तस्मादित्याह मृगयुरिवेति मृगयुर्लुब्धक इव यः कपीं
वालिनं विव्यधे अविध्यत् लुब्धधर्मा कौर्यवान् अलुब्धधर्मेति वा लुब्धको हिलमांसमत्तु कामो विध्यति अ
यं तु न तया अतो वृथा कठिन इत्यर्थः न तथा स्त्रियं वश्रूपं रामवांश्चो जितः सीतापरतं त्रः कामएवयानं
प्राप्तिसाधनं यस्याः तां विरूपां छिन्नकर्णनासिकामकरोत् दाशरथिरूपेण तया बलिमपि सदत्तं ब
लिं अत्वा नत्वापि वाक्षुरं दलवत्काकवत् अवेष्टयत् बबंध वामनरूपेण पाठं तर बलिं पूजां दत्वा
विष्णुपाशगादिधाच्छि पदित्यर्थः तत्तस्माद सितस्य कृष्णस्य सख्यैरलमेवं वेलि मिति तं नित्यं गायतत्त्व
त्तदुस्त्यज स्तत्कथायाः कोपार्थ इति अपि वञ्जानीमस्वतत्कथापि त्रिवर्गलताम्लानिमूलनीति तथापि
नत्यक्तुं शक्नुमः किं कर्मेत्याह यदनुचरितमेव लीला तदेव कर्णपीयूषं तस्य विप्रुट् कणिका तस्याः
सकृददनं सेवनं तेन विधूतानि रस्ताद्वंद्वधर्मा रागादयो येषां ते अतएव विनष्टा असमंतुल्याः दीनं दुः
स्थितं गृहकुटुंबं विहाय दीना नागृही नाविहंगा अपि भिक्षुचर्यां प्राणवृत्तिमात्रं चरं अतस्माद्यस्तथापि ति५
ग्रं त्यक्तुं न शक्नुमः इति निंदापरत्वात्तावधीतोथः दुस्त्यज त्वेपि वाच्ये कोयमर्थः विधूतद्वंद्वधर्माइत्यंतः स
माप्तः पूर्ववत् ततस्ते वतेअविनष्टाश्चेति समासः इतरे पुनः द्वंद्वधर्माणो विनष्टा एवं सपदितत्कर्णामे
वदीनं दुःखं गृहेषु सक्तितं कुटुंबं विहाय दीना इव अकिंचनाः धीरा इति वा पाठः बहवो विहंगाः हंसा इव सा
रासारविवेकचतुराः भिक्षुचर्यां परमहंस्यं चरंति तस्मादेवं परमपुरुषार्थरूपत्वाद्दुस्त्यज एव तत्कथा

येइति नन्वकिमेवं ब्रूषे पूर्वं त्वयैव साकं रतासि किमेवं नानो वदिति अत आह वयमिति हे उपमंत्रिन्
दूत आस्तामियं वार्त्ता यतः क्वजिकस्य मृगयोः रुतं गीतं अज्ञाः यथा कृतं सत्यमिति श्रद्दधानाः
कृष्णस्य हरिणवध्वो नार्यः हरिण्यः शरैः हताः सत्योरुजो ददृशुः एवं जिह्मस्य कुटिलस्य तस्य व्या
हृतं कृतमिति श्रद्दधानाः स्पृष्टं यत्तो वयमसकृदेतद्धरिमर्कितं तस्य नखैः स्पर्शस्तेन तीव्र
स्मरस्तेन रुजः पीडा तस्मादन्या वार्त्ता भण्यतां कथ्यतामिति परावृत्य गत्वा पुनरागतं प्रत्याह
प्रियसख इति हे प्रियसख प्रियस्य सखा कृष्णेन पुनः प्रेषितः किं त्वमागतोसि अंग हे दूत मे माननीयः
पूज्यस्त्वमसि अतो भवान् किमनुरुंध्रे प्राप्तुमिच्छतीत्यर्थः तद्वरय द्वृणीध्व संमानितं प्रत्याह नय
सीति इह सती अस्मान् दुस्त्यजद्वंद्वं मिथुनीभावो यस्य तस्य पार्श्वे समीपं कथं नयसि नेष्यसि
तथाहि हे सौम्य श्रीर्निमवक्षः साकं सह एव सततमास्ते तत्रापि उरसि एव तस्यैव वर्तते न संमंत्रितास
ती ब्रूते अपि बत ते तिरस्कृष्टे हे सौम्य गुरुकुलादागत्य आर्यपुत्रः कृष्णः अधुना किं मधुपुर्यां वर्त्ते
तें कदाचिदपि नो अस्माकं वार्त्ताः किं ब्रूते अगरुवत्सुगंधं भुजं नो मूर्द्धि कदानु धास्यतीति कृष्ण ।

११२

दर्शनोत्सुकाः गोपीः प्रियस्य संदेशैः सांत्वयन् प्रथमं तावदिदमभाषत तदाह षड्भिः अहो इति
समन्वयं पूर्णार्थाः कृतार्थाः श्रेयोभिः श्रेयःसाधनैः अनुत्तमा अतिश्रेष्ठा अर्हणीतद्वत
वत्यः सर्वात्मभावः एकांतभक्तिः अधिकृतः प्राप्तः भगवत्येवमस्त्र्वदर्शनेन मम च महानंदयतः
कृत इति ननु कृष्णस्य रहस्कर रहस्यकार्यैकवर्तिनीवतीनां मे मया सह वियोगो नास्ति अतः स
र्वात्मना सर्वस्योपादानकारणेन अत एव सर्वेषु मन आदिकार्येष्वनुगतत्वेन स्थित इत्याह स
दृष्टांतमाह यथेति भूतेषु चराचरेषु महान्ति भूतानि यथा खं वायुरग्निः वायुसहितोग्निः वायुश्चाग्निश्च
त्यर्थः तथाहं त्वेति मन आदीनि कार्याणि गुणाः कारणं तेषामाश्रयत्वेनानुकारणत्वेन सर्वात्मग
तत्वेन न भेदः स्यात् अत आह आत्मन्येवेति ननु नित्यसिद्धस्य कुतः सृष्ट्यादिरूपता अत आह भू
तेंद्रियगुणात्मना बुद्धींद्रियेति वा पाठः तद्रूपेणेति ननु निर्विकारस्य कुतस्तद्रूपतेति तत्राह आत्म
मायानुभावेनेति नन्वात्मनो भूतादिरूपत्वे तद्दोषप्रसंगस्तत्राह आत्मेति आत्मा शुद्धः कुतः
अगुणान्वयः न गुणेष्वन्वेतीति तथा तत् कुतः व्यतिरिक्तः तदपि कुतः ज्ञानमयः ज्ञानस्वरूप
न च रूपत्वे सवसंबंधमेवात्मनो नानावस्थात्वमिति कुतः शुद्धत्वेति तत्राह सुषुप्त इति मायाका

भा·द·पू·टी

र्यमनोवृत्तिभिः विश्वतैजसप्राज्ञरूपेण प्रतीयते न स्वतरस्वार्थः कृतः मनोनिरोधे तदभावादिति
व्यतिरेकं दर्शयितुं मनोनिरोधं विघ्नत्रयेनेति उक्तिः कुमान्यथा मिथ्यात्मत्तमेव स्वप्नं ध्यायते
एवं बाधित्वा न पीडियार्थान् शब्दादीन् येन मनसा ध्यायेत् तं मनसा चिंतयेत् ध्यायंश्च येन इंद्रिया
णि प्रत्यपद्यत प्रापातन्मनः विनिद्रः अनलसः सन्निकृष्यान्नियच्छेदिति तावता वकृतार्थो भव
तीत्याह एतदंत इति एष मनोनिरोधः अंतः समाप्तिः फलं यस्य सः समाम्नायो वेदः स तत्र पर्यवस्य
तीत्यर्थः योगो ष्टांगः सांख्य आत्मानात्मविवेकः त्यागस्संन्यासः तपः स्वधर्मः दमः इंद्रियदमनं मा
गन्तिदेष्पोकत्र पर्यवसाने दृष्टांतः समुद्रांता आपगा नद्य इवेति नन्वाकिमन्यानिवासानात्मवि
चयाप्रलोभयसि वयं तु सर्वसुंदरसकलगुणालंकृतेन त्वया विरहं नैव सहाम इति वदंत आ
हयत्वं भितिद्वयं दूरयन्नेतिदं तु ध्यानार्थी तत्र मनः सन्निकर्षार्थमित्येतदुपपादयति त्वय्ये
णयथा दूरवइति उपेक्षथेति माधुर्यमात्रमिति वदंत आहुर्या इति त्वेकल्याणः स्वत्कीर्तिः प्रति
बद्धाः यावने क्रीडता मया सह अलब्ध क्रीडास्तास्तदैव मामां आप्त्यः प्रापुः तस्य संदेशेन आग ११२
तास्कृतियोसांता प्रथमार्थे द्वितीया यदूनाम्हितः रात्रुः अघकृत दुःखदः द्विष्ट्येत्यानंदेन आ

स्मि प्राप्ते द्वितैर्वी स्वत अन्या ऊचुः कश्चिदिति नो स्माकं करणीयां प्रीतिं कश्चित्पुरयोषितां करो
ति स्निग्धस्वत सव्रीडहासेनोदारमीक्षणेनार्चितः तानि स्मात्ति वा पुनरन्या ऊचुः कथामि
ति तासां वाक्ये विचित्रमेश्वान्तु नाजितः पूजितः अन्या ऊचुः किमनया चिंतया अस्मान् क्व वि
स्मृत्त्वस्क्त ते स्मरति किं ग्राम्या अविदग्धाः विदग्धा अन्या ऊचुः किमिति अमुदेः रात्रौ केन स्व
रम्ये वृंदावने क्वणंतिवराणन् पुराणि यस्यां तस्यां रासगोष्ठ्यां अस्माभिः प्रियाभिः वीलिता गो५
मनोज्ञाः कथायस्य सः यदा यास्तुनिरास्तु रमेताः कदाचित् किं नु स्मरति वा नवेति त्वन्निमित्ते
नचोकेनतप्तान्नः अस्मान् गात्रैः करस्पर्शादिभिः संजीवयन्नु किं नु द्रक्ष्यतीति अन्या ऊ
चुः कस्मादिति अनन्यगतित्वेन पूर्व मत्राव सत्संप्रति मरुदेश्वर्यं प्राप्तः कस्मादितरागमि
ष्यतीति अन्यास्तु परमार्थमूचुः किमस्माभिरिति वनचरीभिरस्माभिः अन्यास्त्रिवीराजक
न्याभिर्भ आत्मनो धीरस्य किं वश्यायते तदप्यास्तां स्वत एवाप्तकामस्य अतः कृतात्मनः पूर्णका
मस्य किंकोप्यर्थः क्रियेत न कश्चिदिति यतो धृष्टमानकस्संगा शैवाद्भ्यान्याकुलयत्यत्र
ता नैराश्यमेव परं सुखं तत्त्वातिदुष्करमित्याहुः परं सौख्यमि। इति स्वैरिणी कामचारिणी संवि

दमेकांतवार्त्तांकिंवतद्विस्मृतौनतावद्दुःखमस्तिसापिनास्माकंसंजवतीत्याङ्ःचयेणस-
रिक्लेलेतिआचरिताःसेविताःहेउद्धवकथंविस्मरामेतिश्रीकृष्णमथोदंजङ्गात्वातंचस्वात्म-
नंज्ञात्वाविनुदन्अपनुदन्सरिद्वनगिरिदर्योदिषुप्रत्येकंकृष्णलीलासंप्रश्नोदितिस्तंस्मा
रयन्रेमेकृष्णावेशेनात्मनोमनसोविक्षिवंवैक्लव्यंतागोपीर्नमस्यन्नूनमस्करिष्यन्उत्त
मस्यात्मनोगोपस्त्रीनमस्कृतिरन्याय्यानजवतीतिदर्शयितुंतासांमहत्त्वंप्रपंचयतिजगौच्चवा
वएताइतिएताःपरंकेवलंतनुभृतःसफलजन्मानःरूढजावाःपरमप्रेमवल्यःयदितियं
विरूढंजावंजवजियोमुमुक्षवःमुनयोमुक्ताअपिवांछंतिवयंचजक्ताअपिअतोऽनंत
स्यकथासुरसोरागोयस्यंब्रह्मजन्मजिःविप्रसंबंधिजिःश्रौतक्रियाविचयाज्ञिकोस्त्रिजिर्जन्म
जिःकिंकोतिन्नायःयत्रतत्रजातःसएवसर्वोत्तमइत्यर्थःयद्वाअनंतकथासुनरसोयस्यतस्य
ब्रह्मजन्मजिस्त्रिवृत्तमुखजन्मजिरपिकिमितयर्थःकिंवेश्वरप्रसादोमहत्त्वेकारणंतस्यवनजा
तिराचारोज्ञानंवाकारणंकिंतुकेवलंजजनमेवेत्याहक्वेमाइतिसाक्षाद्भजतःपुंसःतुअसो ११४
उपयुक्तःसेवितःअगदराजःअमृतंयथेतिअतांतापूर्वश्लोकंगोपीषुजगवतःप्रसादइत्याहना

तेःरकांतरा

यमितिअंगेवक्षसिउअस्तोनितांतरतिमत्याःश्रियोपिनायंप्रसादःअनुग्रहोस्तिनच
स्वलिनस्यैवगंधोरुक्कांतिश्रियासांतासांस्वर्गिणीनामप्सरसामपिनास्तिअन्याःपु
नदूरतोनिरस्ताःरासोत्सवेकृष्णभुजदंडाभ्यांगृहीतःआलिंगितःकंठस्तेनलब्धाआशी
र्योयाभिस्तासांगोपीनांयदगात्आविर्बभूवकिंचआस्तांतावद्गोपीनांजाग्यंमम
तावच्चार्थीमित्याहआसामितिगोपीनांचरणरेणुजाजांगुल्मादीनांमध्येयत्किंचिद
प्यहंस्यामित्याशंसाकथंजूतानांयाइत्यादिआर्याणांमार्गंचश्रुतिजिर्विमृग्यांपदवींस्वजनंआर्यपथंचहित्वाप्रनस्ताएवविरि
नष्टियावाइतियोगेश्वरैरप्यात्मन्येवाचिंतितंस्तनेषुन्यस्तंपरिरभ्यतापंजहुरितिएवंमह
त्त्वंप्रतिपाद्यनमस्करोतिवंदइतिअनुज्ञाप्यअनुज्ञांयाचित्वाआमंत्र्यस्पृष्ट्वानःअ
स्माकंमनसोवृत्तयःकृष्णपादांबुजाश्रयाःस्युःअभिधायिनीःअभिधायिन्यःनःकृष्णेरतिः
स्यादितिकृष्णादिष्योमत्कुड्केकमात्रउपायनानिवादात्।इतिदशमेसप्तचत्वारिंशोऽध्यायःः॥
अष्टचत्वारिंशकेयत्कृष्णःकुब्जामरीरमत्।अक्रूरस्यगृहंगत्वातंगजाङ्क्यमादिशत्॥

सैरंध्रीकाममापूर्यप्रसयित्वामनोरथान् अक्रूरस्यततः कृष्णस्तेनपार्थानसांत्वयत् महार्हैरं
नघैरूपस्करैर्गर्तोपकरणैरन्वितं कामोपायैस्तदुद्दीपनैःसुरतबंधादिलेखैरूपलक्षितं तथा
यथावितंप्रसाधितोयोग्यतामापादि[तं] आलादेहायथ्यामास्सखीडंयलीलयाउक्तंस्मितंतदु
प्रविश्यमिमुतघकेरीद्धितेरूपलक्षिता अनुलेपार्पणादन्यत्तस्याःपुण्यंनास्तीतिदर्शयितुंपु
ण्यलेशायेत्युक्तं ननुपुण्यस्याल्पत्वविवक्षयाऽत्वादीनांरुजोमृजंतीं जिघ्रंतीवरणं कामम
वपात्कृतदृष्ट्या अयाचत् नत्वगोपाइवसातन्निष्ठातिदुर्भगेत्युक्तं कृतार्थत्वेनुतस्यानसंदेहः
कामएववरस्तंदत्वामानयित्वालंकारादिदानैः मनोयाह्यं विषयसुखं असत्वा तुच्छत्वात्किंचि
च्चिकीर्षयनूहत्तिनापुरप्रस्थानंकारयितुमिच्छन्नित्यर्थः अक्रूरप्रियकाम्ययाच आरात् दूरत
एव आ[] अपद्रुतिच्छेदः अपः आसर्वतोधारयन्नित्यन्वयः वां युवयोरिदं कुलं कृतंसमेधितं
वांमिदंकुलमित्यादिव्यवहारदृष्ट्योक्तापरमार्थमाह युवामितिजगन्मयौ युवां कुतः जगत् ११५
हेतू तदपि कुतः प्रधानपुरुषौ तदात्मकौ अतः त्वदन्यं विनापरं कारणं अपरं कार्यं विना

स्तीतिननुप्रत्यक्षादिसिद्धं कथं नास्तीतिउच्यते अन आह आत्मसृष्टमिति ब्रह्मनूपरमेश्व
रं ब्रह्मेतिवापाठः हे अज आदित्तिः स्वशक्तिभिः आत्मनैवसृष्टमिदं विश्वमन्वाविश्यकारणत्वा
दननुप्रविष्टोप्यनुप्रविश्येवास्थितः श्रुतिप्रत्यक्षगोचरं यथाभवति तथा बहुधा भवानेवप्र
तीयते एकस्यैव बहुधाप्रतीतिं सदृष्टांतामाह यथेति योनिषु स्वस्यैव रूपांतरेणाभिव्यक्ति
स्थानेषु चराचरेषु यथा महीप्रमुखानि कारणान्येव नानाभांति आत्मयोनिषु स्वकारण
कपुत्रलभौतिकेषु नीवोपिनरमृगादि नारी स्त्री बालयुवाद्यवस्थासु च तथातथा प्रतीयतेइति
तद्यवच्छेदाय माक्षतं त्वयाहं गुणानु सृष्ट्यादिकर्तृत्वेन सगुणत्वेन च ममकिंजीववद्बंधमुक्तः
न हि नहीत्याह रज सत्तीतिन गुणकर्मनिर्वर्तैः गुणैः कर्मभिर्वेत्यर्थः यतः कदाचिदपि बं
धहेतुरविद्यात्वनास्ति कुतः इत्यत आह ज्ञानात्मनइति मायया आश्रयानावरकत्वादिति
भावः किंच आस्तां तावत्त्व बंधशंकायतोविद्योपाधेर्जीवात्मनोपि न वस्तुतो बंधोस्तीत्याह दे
हाद्युपाधेरसिद्धेर्ति नवोज न्मांतर मूलानिदानं साक्षात्स्वरूपतो न स्यादिति ननु मम बंधाभावं

दतात्वया किं मोक्षोंगीकृतः ओमिति चेत्तर्हि बंधाभावे मोक्षासंभवादापन्नो बंधोपीत्या
शंक्याह अतइति यतो नाविद्या अतो न बंधश्च मोक्षश्च एवमुभौ न स्यातामित्यर्थः ननुत्व
खले मां बद्धं कृतवानु यमुनाह देतुमुक्तं दृष्टवानसि अतः कथमुत्तयं नास्तित्य अत आत्तनिकामश
ति स्वाभिप्रायानुरूपस्त्वयि नोस्माकमविवेक एव परमेवं तत इति यद्वा नो ऽविवेक एव
परमेवं तत इति यद्वा नो ऽविवेक एव तवाज्ञो स्यातामिति ननु तर्हि ममावतारास्तच्चरित्राणि
वस्तुतो रजतवदविद्याकल्पितान्येव किं मानन्ति न हि यं तु तव लीलेत्याह रूपेण त्वयादितडि
स्फुरतरां स्थायेराजानस्तेषामक्षौहिणीशतानां वधेन त्वमे भौरमपनेतुं स्वांशेन रामेणास
ह्यावतीर्णोसीति अत एवं त्वं तस्य तवागमनेन कृतार्थोस्मीत्याह त्वयेण अद्येति हि इंद्रा अ
द्य नो वसतयो गृहास्तपोवनादपि बहुपुण्याः यावसती स्वं सा दान्त्वविष्टः कथं त्वं तः यस्य
तव पादसलिलमिव गंगा त्रिजगत्पुनाति यं ब्रह्मस्वरूपं वयं दैवतामूर्तिः सत्वे जगद्गुरुरिति स्वमनोरथः ११६
परिहृत इति तु ब्रह्मणाद कः पंडित इति नतगिरः सत्यवाच स्वतोः परं चराणां कः समीयात्पणक्तु

यतः व्यसनशतगतानां क्लेशरोगार्दितानां मरणभयगतानां दुःखशोकातुराणां मशं जग
ति बहुविधानां व्याकुलानां जनानां शरणमशरणानां नित्यमेको हि विष्णुः न केवलं शर
णदः यतो भवान् भजतः सर्वान् अर्थितः कामांश्च ददाति आत्मानमपीति नः अविवेकि
नां तथापि इह गर्ह एव वः युष्माकं प्रजाः पुत्रादिवयमिति ननु न तर्हि देवाः सेव्या इति यास्मि
ह तत्राह देवा इति स्वार्थाः स्वकार्यसाधनपराः साधवस्तु केवलं परानुग्रहपराः परमार्थत
श्च साधव एव देवा इति त एव सेव्या इत्यर्थः तर्हि महाशिलामया देवादयो नैवेत्यत आह न
हीति अम्मयानि तीर्थानि न मृन्मयाः शिलामयाश्च देवा न भवंतीति न अपितु भवंत्येव
तथापि साधूनां तेषां च महदंतरमित्याह ते पुनंतीति किं विविक्षिकीर्षयेनुप्रागादिति
यदुक्तं तत्कार्यमादिशति नः सुहृदां मध्ये भवानुत्तिष्ठः अतः पांडवानां श्रेयश्चिकीर्षया
गजाह्वयं गच्छत्वं गच्छेति यद्वा स्वेति पृथक् पदम् उ त्त्व आलीयेत्यर्थः राज्ञा धृतराष्ट्रे
णावसंते निवसंति शुश्रूषमः कृतवंतो वयं दुष्ट ये स्वपुत्रा दुर्योधनादयस्तहरोन

गच्छतीति तथायतः अंधवत् अंधेनेत्थं॥ ॥ इति दशमे ऽष्टचत्वारिंशः॥ ॥ ऊनपंचाशत्तमे तु गत्वा
क्रूरो गजाह्वयं मूले इत्यत्र व्यवहारं पुत्रेष्वपि च विषमां मामतेः पौरवेंद्राणां यशोभिः तत्कृतदेवगृहा
लयायतनादिभिरंकितम्। बाह्लीकपुत्रः सोमदत्तः गौतमः कृपः अवाप्यं उवास मंदुःप्रजस्य अ
सत्पुत्रस्य अल्पसारस्य मंदधृतेः खलानां कर्णादीनां छंदमनुवर्तितुं शीलमस्येति तथा तत
स्य तेजःप्रभावं ओजः शस्त्रादिनैपुणम् वीर्यं शौर्यं न सहद्भिः असहमानैः चिकीर्षितं इत
त्र परिकर्तुमिष्टम् गरस्य विषस्य दानादि अपरालं च अन्याय्यं तेज इत्येतत्सर्वं कथयामास त
त्कथनात्पूर्वतरं पृथायाह तं मा पृथा चिंतिति अश्रूणां कलालेशाय यो स्त्रीदितीयस्याः हंसा
अपि किं कामयः ऊन स्त्रियः पैतृष्वसेयान्मत्पुत्रान् सांत्वयिष्यति किम् कृष्ण महायोगिन् महात्मन्
योगी उपायो माया स्वा अस्याः [illegible] अस्तीति विश्वात्मन् सर्वांतर्यामिन् हे विश्वभावन विश्व
पालक प्रपन्नां शरणागतां माम् अवसीदंतीति किं यंतीम् आपवर्गिकात् मोक्षप्रदात् पुरुषाय ब्र
मात्मने ब्रह्मणे अपरिच्छिन्नाय परमात्मने जीवरूपाय योगेश्वराय अणिमादियुक्ताय यो ११८

गाय यज्ञानां मनैव पितामहः पांडुः तस्य भार्या प्रसूतो दर्शयामास समं दुःखं सुखं वयस्यस्य
तस्याः पुत्राणामुत्पत्तिहेतुः जित्निः क्लीनकेष्वधर्माणि लेंद्रादिभिः तत्कथने दिर्घ्यैः बंधु
भिः रामकृष्णादिभिः सो हृदिनं गदितं मत्कं यत् तदवदत् इति भ्रातर्युपरते पितृपांडोः पु
त्रे [illegible] पुत्रसस्कुराजासनं त्वमास्थितः इति कटाक्षः नवत तथापि एवं वर्त्तमानः श्रेयो ह्वाप्स्य
सीत्यादि धर्मेणेति तमः नरकं दुःखं महद्दुःखमिति भावः न चात्मजादिष्विष्कथं समत्वं स्या
त्तदा ह नैव विति अत्यंतं नित्यं संवासः सम्यक् स्थितिः तत्र तावदुत्पत्तिमरणयोः सुखदुः
खयोश्चैकेनापि साहित्यं नास्ति त्याह एक इति किंच यदापि सह वसंति तदापि लक्षेगोपा
र्जितवित्तापहारितया पुत्रा नाम शत्रव एव वृत्तेयाह त्याह अधर्मेति संभोजनीयाः पोष्याः
पुत्रादय इति व्यपदेशैः अल्पमेधसा मूढस्य वित्तं हरंति जलौकसो मत्स्यस्य जीवन भू
तानि जलानि यथा तत्सुता हरंति तद्वदिति किंच यानेवं पुष्णाति ते धनमादाय मृता जी
वंतोपि वा तं परित्यजंति त्याह पुष्णातीति स्वबुद्ध्या स्वीया इत्यभिमानेन रायः अर्थाः अ

कृतार्थंअप्राप्तभोगंसपुनःपापैकपाथेयोनरकंविशतीत्यात्स्वयमितिंचसिद्धार्थो
ऽपूर्सीमनोरथंस्वप्नस्थमायावमनोरथश्चतत्तुल्यंआयस्यनियम्यंशांतःसनूसमो
नवेतिदानपतेअक्रूरनंटप्यामिअलमितिनमन्येस्स्न्टताप्रियावाकूवले
अस्थिरेहृदिनस्थीयतेनतिष्ठतीत्यर्थःसुदामापर्वतःतत्रनवाविद्युदिवतस्मिन्नूस्फु
टिकशिलामयेसद्गसेवातिस्फुरिताविघ्नघ्यालीयतेतद्वदित्यर्थः।यद्वासुदाममालाति ।।श्रीः।।
स्याइयंसोदामनी।नचैवंजानतोपिकथमयंमोहइतिवेदततआहईश्वरस्येतिविधिंवि
धानंमायामितियावत्।अतस्तमेवनमस्यतियइतिदुर्विमर्शपथयाआवितर्क्यमार्गया
गुणानुकम्पिणितत्फलानिचविभजतेविविच्यददातिदुःखबोधायोवितानस्तस्यक्री ।।१९८
डासतंचंप्रधानंमुख्यंकारणंयस्यसंसारचक्रस्यअतएवतस्यगतिर्यस्मातत्स्मै
नमइति।अभिप्रेत्यरक्षात्वादेशमस्कंधपूर्वार्द्धेभावार्थस्यदीपिकायस्येयंप्रकृतो
भातिनत्यंतेरसामनः।।।।इतिश्रीपरमानंदविरचितायांश्रीधरस्वामीविरचितायांश्री

भागवतेभावार्थदीपिकायांएकोनपंचाशत्तमोध्यायः।।पूर्वार्द्धंसमाप्तं।।ब्रह्मार्प
णमस्तु।।छ।।श्रीः।।छ।। ।।श्रीः।। ।।छ।। ।।श्रीभगवतेनमः

॥श्रीगणेशायनमः॥ ॥श्रीः॥ ॥छ॥ ॥भगवतेनमः॥

॥श्रीः॥ कृषिर्भुवाचकः शब्दोणश्च निरतिवाचकः॥ तयोरैक्यंपरं ब्रह्मकृ

श्रीः॥ ष्ण इत्यभिधीयते॥१॥ ॥भक्तानुकंपिनेनमः॥ ॥श्रीः॥

मौंजी [illegible] मौंजी स्पा [illegible] ॥ निकृता

१२१ विप्रस्य मेखला [illegible] ११२

[illegible] ता वैवविरा [illegible] शा [illegible] तांत्रनी॥१